# shrI subrahmaNyagadyaM

# શ્રીસુબ્રહ્મણ્યગદ્યમ્

## Document Information

Text title : shrii subrahmaNyagadyaM

File name : subragadya.itx

Category : gadyam, subrahmanya, stotra

Location : doc_subrahmanya

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma antaratma at Safe-mail.net

Latest update : October 7, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# શ્રીસુબ્રહ્મણ્યગદ્યમ્

પુરહરનન્દન રિપુકુલભઞ્જન, દિનકરકોટિ રૂપ
પરિહૃતલોકતાપ, શિકીન્દ્રવાહન મહેન્દ્રપાલન
વિધૃતસકલભુવનમૂલ વિધુતનિખિલદનુજતૂલ
તાપસસમારાધિત પાપજવિકારાજિત,
કારુણ્યસલિલપૂરાધાર મયૂરવરવાહન મહેન્દ્રગિરિકેતન,
ભક્તિપરગમ્ય, શક્તિકરરમ્ય, પરિપાલિતનાક,
પુરશાસનપાક,, નિખિલલોકનાયક,
ગિરિવિદારિસાયક, મહાદેવભાગધેય,
વિનતશોકનિવારણ, વિવિધલોકકારણ, સુરવૈરિકાલ
પુરવૈરિબાલ, ભવબન્ધનવિમોચન,
દળદંબુજવિલોચન, કરુણામૃતરસસાગર,
તરુણામૃતકરશેખર, વલ્લીમાનહારવેષ
મલ્લીમાલભારિકેશ, પરિપાલિતવિબુધલોક,
પરિકાલિતવિનતશોક, મુખવિજિતચન્દિર,
નિખિલગુણમન્દિર, ભાનુકોટિસદૃશરૂપ
વિતૃમનોહારિમન્દહાસ, રિપુશિરોદારિચન્દ્રહાસ,
શ્રુતિકલિતમણિકુણ્ડલરુચિવિજિત રવિમણ્ડલ,
ભુજવરવિજિતસાલ ભજનપરમનુજપાલ, ન
 વવીરસંસેવિત રણધીર સંભાવિતમનોહરશીલ
મહેન્દ્રારિકીલ, કુસુમવિશદહાસ કલશિખરનિવાસ,
વિજિતકરણમુનિસેવિત વિગતમરણજનિભાષિત,
સ્કન્દપુરનિવાસ નન્દનકૃતવિલાસ, કમલાસનવિનત
ચતુરાગમવિનુત, કલિમલવિહીન કૃતસેવન
સરસિજનિકાશશુભલોચન, અહાર્યાનરધીર
અનાર્યાનરદૂર, વિદળિત રોગજાલ, વિરચિતભોગમૂલ

ભોગીન્દ્રભાસિત યોગીન્દ્રભાવિત, પાકશાસનપરિપૂજિત
નાકવાસિનિકરસેવિત, વિદ્રુતવિદ્યાધર,
વિદ્રુમહૃદ્યાધર, દળિતદનુજવેતણ્ડ,
વિબુધવરદકોદણ્ડપરિપાલિતભૂસુર,
મણિભૂષણભાસુર, અતિરમ્યસ્વભાવ,
શ્રુતિગમ્યપ્રભાવ, લીલાવિશેષતોષિતશઙ્કર,
સુમસમરદન શશધરવદન વિજયીભવ! વિજયીભવ!

॥ ઇતિ સુબ્રહ્મણ્યગદ્યં સંપૂર્ણમ્ ॥

Encoded and proofread by
Antaratma antaratma at Safe-mail.net

---

*shrI subrahmaNyagadyaM*
pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*